श्री आदित्य स्तोत्रं (भविष्यपुराणे)

श्री आदित्य स्तोत्रं (भविष्यपुराणे)

नवग्रहाणां सर्वेषां सूर्यादीनां पृथक् पृथक् |
पीडा च दुस्सहा राजन् जायते सततं नृणां || 1 ||

पीडानाशाय राजेंद्र नामानि शृणु भास्वतः |
सूर्यादीनां च सर्वेषां पीडा नश्यति शृण्वतः || 2 ||

आदित्यः सविता सूर्यः पूषार्कः शीघ्रगो रविः |
भगस्त्वष्टाऽर्यमा हंसो हेलिस्तेजोनिधिर्हरिः || 3 ||

दिननाथो दिनकरः सप्तसप्तिः प्रभाकरः |
विभावसुर्वेदकर्ता वेदांगो वेदवाहनः || 4 ||

हरिदश्वः कालवक्त्रः कर्मसाक्षी जगत्पतिः |
पद्मिनीबोधको भानुर्भास्करः करुणाकरः || 5 ||

द्वादशात्मा विश्वकर्मा लोहितांगस्तमोनुदः |
जगन्नाथोऽरविंदाक्षः कालात्मा कश्यपात्मजः || 6 ||

भूताश्रयो ग्रहपतिः सर्वलोकनमस्कृतः |
जपाकुसुमसंकाशो भास्वानदितिनंदनः || 7 ||

ध्वांतेभसिंहः सर्वात्मा लोकनेत्रो विकर्तनः |
मार्तांडो मिहिरः सूरस्तपनो लोकतापनः || 8 ||

जगत्कर्ता जगत्साक्षी शनैश्चरपिता जयः |
सहस्ररश्मिस्तरणिर्भगवान्भक्तवत्सलः || 9 ||

विवस्वानादिदेवश्च देवदेवो दिवाकरः |
धन्वंतरिर्व्याधिहर्ता दद्रुकुष्ठविनाशनः || 10 ||

चराचरात्मा मैत्रेयोऽमितो विष्णुर्विकर्तनः |
लोकशोकापहर्ता च कमलाकर आत्मभूः || 11 ||

नारायणो महादेवो रुद्रः पुरुष ईश्वरः |
जीवात्मा परमात्मा च सूक्ष्मात्मा सर्वतोमुखः || 12 ||

इंद्रोऽनलो यमश्चैव नैर्ऋतो वरुणोऽनिलः |
श्रीद ईशान इंदुश्च भौमः सौम्यो गुरुः कविः || 13 ||

शौरिर्विधुंतुदः केतुः कालः कालात्मको विभुः |
सर्वदेवमयो देवः कृष्णः कामप्रदायकः || 14 ||

य एतैर्नामभिर्मर्त्यो भक्त्या स्तौति दिवाकरं |
सर्वपापविनिर्मुक्तः सर्वरोगविवर्जितः || 15 ||

पुत्रवान् धनवान् श्रीमान् जायते स न संशयः |
रविवारे पठेद्यस्तु नामान्येतानि भास्वतः || 16 ||

पीडाशांतिर्भवेत्तस्य ग्रहाणां च विशेषतः |
सद्यः सुखमवाप्नोति चायुर्दीर्घं च नीरुजं || 17 ||

इति श्रीभविष्यपुराणे श्री आदित्य स्तोत्रं ||